**CLASS : 10th (Secondary)** **Code No. 3541**

**Series : Sec/Annual Exam.-2026**

*रोल नं०* | | | | | | | | | | |

# पूर्व मध्यमा सह माध्यमिक परीक्षा संस्कृत साहित्य (आर्ष पद्धति गुरुकुल)

**Sub. Code : 1001/SKS**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **9** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*

- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशाः*** - (क) ***सर्वे प्रश्नाः समाधेयाः।***

(ख) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ग) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(घ) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

## खण्डः 'क'

### (बहुविकल्पीयाः प्रश्नाः)

**1.** अधोविन्यस्तानामेकं समीचीनमुत्तरं विचित्य लिखत – 1 × 16 = 16

(i) यजुर्वेदस्य एकत्रिंशाध्याये कियन्तो मन्त्राः ?

(क) त्रिंशत् (ख) पञ्चविंशतिः

(ग) द्वाविंशतिः (घ) अष्टादश

(ii) भूरिगुष्णिक्-छन्दसि कति वर्णा भवन्ति ?

(क) 30 (ख) 29

(ग) 28 (घ) 31

(iii) यजुर्वेदस्य एकत्रिंशाध्याये किं प्रसिद्धं सूक्तं विद्यते ?

(क) पुरुषसूक्तम् (ख) शिवसङ्कल्पसूक्तम्

(ग) अग्निसूक्तम् (घ) पृथिवीसूक्तम्

(iv) 'न तस्य प्रतिमाऽअस्ति०' मन्त्रेऽस्मिन् कस्य स्वरूपं वर्ण्यते ?

(क) परमेश्वरप्रतिमायाः (ख) परमेश्वरस्य

(ग) जीवात्मनः (घ) प्रवृतेः

(v) वैदिकगीतायाः रचनाकारः कः ?

(क) श्रीकृष्णः (ख) वेदव्यासः

(ग) वाल्मीकिः (घ) स्वामी आत्मानन्दः

(vi) 'हृषीकेशः' इत्यनेन कः सम्बोध्यते ?

(क) अर्जुनः (ख) श्रीकृष्णः

(ग) सञ्जयः (घ) धृतराष्ट्रः

(vii) जातस्य हि किं ध्रुवम् ?

(क) जन्म (ख) भावः

(ग) नाशः (घ) मृत्युः

(viii) अर्जुनस्य धनुषः नाम किम् ?

(क) गाण्डीवम् (ख) सुघोषः

(ग) पॉण्ड्रूम् (घ) अनन्तविजयः

(ix) मित्रसम्प्राप्तौ कति उपकथाः ?

(क) 08 (ख) 10

(ग) 06 (घ) 09

(x) क अर्थान् साधयति ?

(क) मित्रवान् (ख) भ्रातृमान्

(ग) आत्मवान् (घ) पितृमान्

(xi) स्वयमुपार्जितं वित्तं कथं भोक्तव्यम् ?

(क) झटिति (ख) शनैः शनैः

(ग) एकाकिना (घ) न भोक्तव्यम्

(xii) सत्यार्थप्रकाशे कति समुल्लासाः ?

(क) 12 (ख) 10

(ग) 14 (घ) 08

(xiii) कीदृशीं वाचं वदेत् ?

(क) वस्त्रपूताम् (ख) मनःपूताम्

(ग) सत्यपूताम् (घ) सर्वविधाम्

(xiv) 'साहित्यसुधायाः' रचनाकारः कः ?

(क) मेधाव्रतः (ख) आत्मानन्दः

(ग) दयानन्दः (घ) श्रीकृष्णः

(xv) कस्य योगे पञ्चमी विभक्तिर्न भवति ?

(क) धिक्    (ख) आङ्

(ग) अप्    (घ) परि

(xvi) रुद्-धातोः लट् लकारे किं रूपम् ?

(क) रोदति    (ख) रुदिति

(ग) रुदेति    (घ) रोदिति

**खण्डः 'ख'**

**(अतिलघूत्तरीयाः प्रश्नाः)**

**2.** अधस्तनानां गद्यभागानां हिन्दीभाषायामर्थो विधीयताम् – 2 × 4 = 8

(क) अत्रान्तरे चित्रग्रीवो नाम कपोतराजः सहस्रपरिवारः प्राण-यात्रार्थं परिभ्रमंस्तांस्तण्डुलान् दूरतोऽपि पश्यँल्लधुपतनकेन निवार्यमाणोऽपि जिह्वालॉल्याद्भक्षणार्यमपतत्, सपरिवारो निबद्धश्च।

(ख) आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात्।

दिनस्य पूर्वार्ध-परार्धभिन्ना, छायेव मैत्री खलसज्जनानाम्।।

(ग) तच्छ्रुत्वा, सानन्दं वायस आह - "यद्येवं तद्धन्योऽहं, यद् भवतापि सह तत्र कालं नयामि। अहं सम्पातादिकानष्टावु-ड्डीनगतिविशेषान् वेद्मि। तत्समारोहय मम पृष्ठम्, येन सुखेन त्वां तत्सरः प्रापयामि।"

(घ) अहमपि यावन्निधानरहितं स्थानमागच्छामि, तावदरमणीयमुद्-वेगकारकं तत्स्थानं वीक्षितुमपि न शक्नोमि। अचिन्तयं च-किं करोमि, क्व गच्छामि, कथं मे स्यान्मनसः प्रशान्तिः ?"

**3.** निम्नलिखितानां पद्यानां हिन्द्यामर्थं कुरुत – $2 \times 3 = 6$

(क) पिता स्वर्गः पिता धर्मः पिता हि परमन्तपः।
पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः।।

(ख) हितोपदेशं श्रुत्वा तु कुर्वीत च यथोचितम्।
विदुरोक्तमकृत्वा तु शोच्योऽभूत्कौरवेश्वरः।।

(ग) एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

**4.** अधोलिखितानां मन्त्राणां पूर्तिं विधेहि – $2 \times 3 = 6$

(क) एतावानस्य महिमातो०

(ख) ब्राह्मणोऽस्य मुखमासीत्०

(ग) स नो बन्धुर्जनिता०

**खण्डः 'ग'**

**(लघूत्तरीयाः प्रश्नाः)**

**5.** निम्नाङ्कितानां श्लोकानां सप्रसङ्गं व्याख्यां कुरुत – $4 \times 3 = 12$

(क) न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।
किन्नो राज्येन गोविन्द किम्भोगैर्जीवितेन वा।।

(ख) नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।

(ग) व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।

बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्।।

**6.** अधस्तनं प्रश्नद्वयमपि समाधीयताम् – 4 × 2 = 8

(क) संन्यासाश्रमस्य उपयोगितां वर्णयत।

(ख) वानप्रस्थविधिं वर्णयत।

**खण्डः 'घ'**

**(निबन्धात्मकप्रश्नाः)**

**7.** मन्त्रद्वयस्य सप्रसङ्गं व्याख्यां कुरुत – 6 × 2 = 12

(क) पुरुषऽएवेदं सर्वं यद् भूतं यच्च भाव्यम्।

उतामृतत्वस्येशानो यदन्नेनातिरोहति।।

**अथवा**

मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।

मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा।।

(ख) तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्माद्यजुस्तस्त्रादजायत।।

**अथवा**

यां मेधां देवगणाः पितरश्चोपासते।

तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा।।

**8.** वैदिकगीतायाः द्वितीयाध्यायस्य सारं ***अथवा*** अर्जुनस्य विषादं वर्णयत। $6 \times 1 = 6$

**9.** पञ्चतन्त्रानुसारं तिलचूर्णविक्रयकथायाः ***अथवा*** वाणिक्पुत्रकथायाः सारं लिखत। $6 \times 1 = 6$